

॥ श्रीगुरुभ्यो नमः ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

## चतुर्थकाण्डे तृतीयः प्रश्नः

### चितिवर्णनं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

अपान्त्वेमन्थ् सादयाम्यपान्त्वोद्मन्थ् सादयाम्यपान्त्वा भस्मन्थ् सादयाम्यपान्त्वा ज्योतिषि सादयाम्यपान्त्वाऽयने सादयाम्यर्णवे सदने सीद समुद्रे सदने सीद सलिले सदने सीदापा-ङ्क्षये सीदापाꣳ सधिषि सीदापान्त्वा सदने सादयाम्यपान्त्वा सधस्थे सादयाम्यपान्त्वा पुरीषे सादयाम्यपान्त्वा योनौ सादयाम्यपान्त्वा पाथसि सादयामि गायत्री छन्दस्त्रिष्टुप् छन्दो जगती छन्दोऽनुष्टुप् छन्दः पङ्क्ति श्छन्दः ॥ [१] ॥

(योनौ पञ्चदश च) ॥ १ ॥

अयम्पुरो भुवस्तस्य प्राणो भौवायनो वसन्तः प्राणायनो गायत्री वासन्ती गायत्रियै गायत्र-ङ्गायत्रादुपाꣳशुरुपाꣳशोस्त्रिवृत् त्रिवृतो रथन्तरꣳ रथन्तराद्वसिष्ठ ऋषिः प्रजापतिगृहीतया त्वया प्राणङ्गृह्णामि प्रजाभ्योऽयन्दक्षिणा विश्वकर्मा तस्य मनो वैश्वकर्मणङ्ग्रीष्मो मानसस्त्रिष्टुग्ग्रैष्मी त्रिष्टुभ ऐडमैडादन्तर्यामोऽन्तर्यामात् पञ्चदशः पञ्चदशाद्बृहद्बृहतो भरद्वाज ऋषिः प्रजापतिगृ-हीतया त्वया मनो ॥ [२] ॥ गृह्णामि प्रजाभ्योऽयम्पश्चाद्विश्वव्यचास्तस्य चक्षुर् वैश्वव्यचसं वर्षाणि चाक्षुषाणि जगती वार्षी जगत्या ऋक्षममृक्षमाच्छुक्रः शुक्रात् सप्तदशः सप्तद-शाद्वैरूपव्वैरूपाद्विश्वामित्र ऋषिः प्रजापतिगृहीतया त्वया चक्षुर् गृह्णामि प्रजाभ्य इदमुत्तरात्

सु॒व॒स्तस्य॒ श्रोत्र॑ꣳ सौ॒वꣳ श॒रच्छ्रौ॒त्र्य॑नु॒ष्टुप्छा॑र॒द्य॑नु॒ष्टुभ॑ः स्वा॒रꣳ स्वा॒रान्म॒न्थी म॒न्थिन॑ एकवि॒ꣳ॒श एक॑वि॒ꣳ॒शाद् वै॑रा॒जव्वैँ॑रा॒जाज्ज॒मद॑ग्निर्॒ऋषि॑ः प्र॒जाप॑तिगृहीतया॒ ॥ [३] ॥ त्वया॒ श्रोत्र॑ङ्गृह्णामि प्र॒जाभ्य॑ इ॒यमु॒परि॑ म॒तिस्तस्यै॒ वाङ्मा॒ती हे॑म॒न्तो वा॑च्या॒यनः॒ प॒ङ्क्तिर् है॑म॒न्ती प॒ङ्क्त्यै नि॒धन॑व-न्नि॒धन॑वत आग्रय॒ण आ॑ग्रय॒णात् त्रि॑णवत्रयस्त्रि॒ꣳ॒शौ त्रि॑णवत्रयस्त्रि॒ꣳ॒शाभ्या॑ꣳ शाक्वररैव॒ते शा॑क्व-ररैव॒ताभ्या॑व्विँश्वक॒र्मर्षि॑ः प्र॒जाप॑तिगृहीतया॒ त्वया॒ वाच॑ङ्गृह्णामि प्र॒जाभ्य॑ः ॥ [४] ॥

(त्वया॒ मनो॑ ज॒मद॑ग्निर्॒ऋषि॑ः प्र॒जाप॑तिगृहीतया त्रि॒ꣳ॒शच्च॑) ॥ २ ॥

प्राची॑ दि॒शाव्वँ॑स॒न्त ऋ॑तू॒नाम॒ग्निर् दे॒वता॒ ब्रह्म॒ द्रवि॑णन्त्रि॒वृथ् स्तोम॒ः स उ॑ पञ्चद॒शव॑-र्तनि॒ स्त्र्यवि॒र् वय॑ः कृ॒तमया॑नाम्पुरोवा॒तो वा॒तः सान॑ग ऋषि॒र् द॒क्षिणा दि॒शाङ्ग्री॒ष्म ऋ॑तू॒-नामिन्द्रो॑ दे॒वता॑ क्ष॒त्रन्द्रवि॑णम्पञ्चद॒शः स्तोम॒ः स उ॑ सप्तद॒शव॑र्तनिर् दि॑त्य॒वाड्वय॒स्त्रेताऽया॑-नान्द॒क्षिणाद्वा॒तो वा॑त॒ः सना॒तन॒ ऋषि॑ः प्र॒तीची॑ दि॒शाव्वँ॒र्॒षा ऋ॑तू॒नाव्विँश्वे॑ दे॒वा दे॒वता॒ विड् ॥ [५] ॥ द्रवि॑णꣳ सप्तद॒शः स्तोम॒ः स उ॑वेकवि॒ꣳ॒शव॑र्तनिस्त्रि॒वथ्सो वयो॑ द्वाप॒रोऽया॑नाम्पश्चा-द्वा॒तो वा॒तोऽहभू॒न ऋषि॑रु॒दीची॑ दि॒शाꣳ श॒रदृ॑तू॒नाम्मि॒त्रावरु॑णौ दे॒वता॑ पु॒ष्टन्द्रवि॑णमेकवि॒ꣳ॒शः स्तोम॒ः स उ॑ त्रिण॒वव॑र्तनिस्तु॒र्य॒वाड् वय॑ आस्क॒न्दोऽया॑नामुत्तराद्वा॒तो वा॑त॒ः प्र॒त्न ऋषि॑रू॒र्ध्वा दि॒शाꣳ हे॑मन्तशिशि॒रावृ॑तू॒नाम्बृह॒स्पति॒र् दे॒वता॒ वर्चो॒ द्रवि॑णन्त्रिण॒वः स्तोम॒ः स उ॑ त्रयस्त्रि॒ꣳ॒श-व॑र्तनिः पष्ठ॒वाद् वयो॑ ऽभि॒भूरया॑नाव्विँष्व॒ग्वा॒तो वा॑त॒ः सु॒प॒र्ण ऋषि॑ः पि॒तर॑ः पिताम॒हाः परेऽव॑रे॒ ते न॑ः पान्तु॒ ते नो॑ऽवन्त्व॒स्मिन् ब्रह्म॑न्न॒स्मिन् क्ष॒त्रे॑ऽस्यामा॒शिष्य॒स्यां पु॑रो॒धाया॑म॒स्मिन् कर्म॑न्न॒स्या-न्दे॒वहू॑त्याम् ॥ [६] ॥

(विट् प॑ष्ठ॒वाद् वयो॒ ऽष्टावि॑ꣳशतिश्च) ॥ ३ ॥

ध्रु॒वक्षि॑तिर् ध्रु॒वयो॑निर् ध्रु॒वाऽसि॑ ध्रु॒वाय्यौँ॒निमा सी॑द सा॒द्ध्या। उ॒ख्य॑स्य के॒तुम्प्र॑थ॒मम्पु॒रस्ता॑-द॒श्विना॑ऽद्ध्व॒र्यू सा॑दयतामि॒ह त्वा॑॥ स्वे द॒क्षे द॒क्षपि॑ते॒ह सी॑द दे॒वत्रा पृ॑थि॒वी बृ॒ह॒ती ररा॑णा। स्वा॒स॒स्था त॒नुवा॒ सव्विँ॑शस्व पि॒तेवै॑धि सू॒नव॒ आ सु॒शेवा॒ऽश्विना॑ऽद्ध्व॒र्यू सा॑दयतामि॒ह त्वा॑॥

कुलायिनी वसुमती वयोधा रयिन्नो वर्द्ध बहुलꣳ सुवीरम् ॥ [७] ॥ अपामतिन्दुर्मतिम्बाधमाना रायस्पोषे यज्ञपतिमाभजन्ती सुवर् धेहि यजमानाय पोषमश्विनाऽद्ध्वर्यू सादयतामिह त्वा॥ अग्नेः पुरीषमसि देवयानी तान्त्वा विश्वे अभि गृणन्तु देवाः। स्तोमपृष्ठा घृतवतीह सीद प्रजावदस्मे द्रविणाऽऽ*यजस्वाश्विनाऽद्ध्वर्यू सादयतामिह त्वा॥ दिवो मूर्द्धाऽसि पृथिव्या नाभिर् विष्टंभनी दिशामधिपत्नी भुवनानाम् ॥ [८] ॥ ऊर्मिर् द्रप्सो अपामसि विश्वकर्मा त ऋषिरश्विनाऽद्ध्वर्यू सादयतामिह त्वा॥ सजूर्ऋतुभिः सजूर् विधाभिः सजूर् वसुभिः सजू रुद्रैः सजूरादित्यैः सजूर् विश्वैर् देवैः सजूर् देवैः सजूर् देवैर् वयोनाधैरग्नये त्वा वैश्वानरायाश्विनाऽद्ध्वर्यू सादयतामिह त्वा॥ प्राणम्मे पाह्यपानम्मे पाहि व्यानम्मे पाहि चक्षुर् म उर्व्या वि भाहि श्रोत्रम्मे श्लोकयापस्पिन्वौषधीर् जिन्व द्विपात् पाहि चतुष्पादव दिवो वृष्टिमेरय ॥ [९] ॥

(सुवीरं भुवनाना मुर्व्या सप्तदश च) ॥ ४ ॥

त्र्यविर्वय स्त्रिष्टुप् छन्दो दित्यवाड् वयो विराट् छन्दः पञ्चाविर् वयो गायत्री छन्दस्त्रिवथ्सो वय उष्णिहा छन्द स्तुर्यवाड् वयोऽनुष्टुप् छन्दः पष्ठवाद्वयो बृहती छन्द उक्षा वयः सतोबृहती छन्द ऋषभो वयः ककुच्छन्दो धेनुर् वयो जगती छन्दोऽनड्वान्वयः पङ्क्ति श्छन्दो बस्तो वयो विवलञ्छन्दो वृष्णिर् वयो विशालञ्छन्दः पुरुषो वय स्तन्द्रञ्छन्दो व्याघ्रो वयोऽनाधृष्टञ्छन्दः सिꣳहो वय श्छदि श्छन्दो विष्टंभो वयोऽधिपति श्छन्दः क्षत्रं वयो मयन्दञ्छन्दो विश्वकर्मा वयः परमेष्ठी छन्दो मूर्द्धा वयः प्रजापति श्छन्दः ॥ [१०] ॥

(पुरुषो वयःषड्विꣳशतिश्च) ॥ ५ ॥

इन्द्राग्नी अव्यथमानामिष्टकान्दꣳहतय्युँवम्। पृष्ठेन द्यावापृथिवी अन्तरिक्षञ्च वि बाधताम्॥ विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठे व्यचस्वतीम्प्रथस्वतीम्भास्वतीꣳ सूरिमतीमा या द्याम्भास्या पृथिवीमोर्वन्तरिक्षमन्तरिक्षय्यँच्छान्तरिक्षन्दꣳहान्तरिक्षम्मा हिꣳसीर् विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय वायुस्त्वाऽभि पातु मह्या स्वस्त्या छर्दिषा

॥ [११] ॥ शन्तमेन तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद ॥ राज्ञ्यसि प्राची दिग्विराडसि दख्षिणा दिख् सम्राडसि प्रतीची दिख्स्वराडस्युदीची दिगधिपत्न्यसि बृहती दिगायुर् मे पाहि प्राणम्मे पाह्यपानम्मे पाहि व्यानम्मे पाहि चख्षुर् मे पाहि श्रोत्रम्मे पाहि मनो मे जिन्व वाचम्मे पिन्वा ऽऽत्मानम्मे पाहि ज्योतिर् मे यच्छ ॥ [१२] ॥

(छर्दिषा पिन्व षट्) ॥ ६ ॥

मा छन्दः प्रमा छन्दः प्रतिमा छन्दोऽस्त्रीवि श्छन्दः पङ्क्ति श्छन्द उष्णिहा छन्दो बृहती छन्दोऽनुष्टुप् छन्दो विराट् छन्दो गायत्री छन्दस्त्रिष्टुप् छन्दो जगती छन्दः पृथिवी छन्दोऽन्तरि-ख्षञ्छन्दो द्यौ श्छन्दः समा श्छन्दो नख्षत्राणि छन्दो मन श्छन्दो वाक् छन्दः कृषि श्छन्दो हिरण्यञ्छन्दो गौ श्छन्दोऽजा छन्दोऽश्व श्छन्दः। अग्निर् देवता ॥ [१३] ॥ वातो देवता सूर्यो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवताऽऽदित्या देवता विश्वे देवा देवता मरुतो देवता बृहस्पतिर् देवतेन्द्रो देवता वरुणो देवता मूर्द्धाऽसि राड् ध्रुवाऽसि धरुणा यन्त्र्यसि यमि-त्रीषे त्वोर्जे त्वा कृष्यै त्वा ख्षेमाय त्वा यन्त्री राड् ध्रुवाऽसि धरणी धर्त्र्यसि धरित्र्यायुषे त्वा वर्चसे त्वौजसे त्वा बलाय त्वा ॥ [१४] ॥

(देवता ऽऽयुषे त्वा षट्) ॥ ७ ॥

आशुस्त्रिवृद्भान्तः पञ्चदशो व्योम सप्तदशः प्रतूर्तिरष्टादश स्तपो नवदशोऽभिवर्तः सविꣳशो धरुण एकविꣳशो वर्चो द्वाविꣳशः संभरणस्त्रयोविꣳशो योनिश्चतुर्विꣳशो गर्भाः पञ्चविꣳश ओजस्त्रिणवः क्रतुरेकत्रिꣳशः प्रतिष्ठा त्रयस्त्रिꣳशो ब्रध्नस्य विष्टपञ्चतुस्त्रिꣳशो नाकः षट्त्रिꣳशो विवर्तोऽष्टाचत्वारिꣳशो धर्त्रश्चतुष्टोमः ॥ [१५] ॥

(आशुः सप्तत्रिꣳशत्) ॥ ८ ॥

अग्नेर् भागोऽसि दीक्षाया आधिपत्यम्ब्रह्म स्पृतन्त्रिवृथ् स्तोम इन्द्रस्य भागोऽसि विष्णो-
राधिपत्यङ्क्षत्रꣳ स्पृतम्पञ्चदशः स्तोमो नृचक्षसाम्भागोऽसि धातुराधिपत्यञ्जनित्रꣳ स्पृतꣳ
सप्तदशः स्तोमो मित्रस्य भागोऽसि वरुणस्याऽऽधिपत्यन्दिवो वृष्टिर् वाताः स्पृता एक-
विꣳशः स्तोमोऽदित्यै भागोऽसि पूष्ण आधिपत्यमोजः स्पृतन्त्रिणवः स्तोमो वसूनां भागोऽसि
॥ [१६] ॥ रुद्राणामाधिपत्यञ्चतुष्पाथ् स्पृतञ्चतुर्विꣳशः स्तोम आदित्यानाम्भागोऽसि मरु-
तामाधिपत्यङ्गर्भाः स्पृताः पञ्चविꣳशः स्तोमो देवस्य सवितुर् भागोऽसि बृहस्पतेराधिपत्यꣳ
समीचीर् दिशः स्पृताश्चतुष्टोमः स्तोमो यावानां भागोऽस्ययावानामाधिपत्यम्प्रजाः स्पृताश्च-
तुश्चत्वारिꣳशः स्तोम ऋभूणाम्भागोऽसि विश्वेषान्देवानामाधिपत्यम्भूतन्निशान्तꣳ स्पृतन्त्रय-
स्त्रिꣳशः स्तोमः ॥ [१७] ॥

(वसूनाम्भागोऽसि षड्त्वारिꣳशच्च) ॥ ९ ॥

---

एकयाऽस्तुवत प्रजा अधीयन्त प्रजापतिरधिपतिरासीत् तिसृभिरस्तुवत ब्रह्मासृज्यत ब्रह्मण-
स्पतिरधिपतिरासीत् पञ्चभिरस्तुवत भूतान्यसृज्यन्त भूतानाम्पतिरधिपतिरासीथ् सप्तभिरस्तुवत
सप्तर्षयोऽसृज्यन्त धाताऽधिपतिरासीन्नवभिरस्तुवत पितरोऽसृज्यन्ताऽ*दितिरधिपत्न्यासी-
देकादशभिरस्तुवतर्तवोऽसृज्यन्ताऽऽर्तवोऽधिपतिरासीत् त्रयोदशभिरस्तुवत मासा असृज्यन्त
सँव्वथ्सरोऽधिपति ॥ [१८] ॥ रासीत् पञ्चदशभिरस्तुवत क्षत्रमसृज्यतेन्द्रोऽधिपतिरासीथ्
सप्तदशभिरस्तुवत पशवोऽसृज्यन्त बृहस्पतिरधिपतिरासीन्नवदशभिरस्तुवत शूद्रार्यावसृज्ये-
तामहोरात्रे अधिपत्नी आस्तामेकविꣳशत्याऽस्तुवतैकशफाः पशवोऽसृज्यन्त वरुणोऽधिपति-
रासीत् त्रयोविꣳशत्याऽस्तुवत क्षुद्राः पशवोऽसृज्यन्त पूषाऽधिपतिरासीत् पञ्चविꣳशत्या
ऽस्तुवताऽऽरण्याः पशवोऽसृज्यन्त वायुरधिपतिरासीथ् सप्तविꣳशत्याऽस्तुवत द्यावापृथिवी व्यै
॥ [१९] ॥ ताँव्वसवो रुद्रा आदित्या अनु व्यायन् तेषामाधिपत्यमासीन्नवविꣳशत्याऽस्तुवत
वनस्पतयोऽसृज्यन्त सोमोऽधिपतिरासीदेकत्रिꣳशताऽस्तुवत प्रजा असृज्यन्त यावानां चाया-
वानाञ्चाऽऽधिपत्यमासीत् त्रयस्त्रिꣳशताऽस्तुवत भूतान्यशाम्यन् प्रजापतिः परमेष्ठ्यधिपति-
रासीत् ॥ [२०] ॥

(सव्ँवथ्सरोऽधिपतिर्वि पञ्चत्रिꣳशच्च) ॥ १० ॥

इयमेव सा या प्रथमा व्यौच्छदन्तरस्याञ्चरति प्रविष्टा। वधूर् जजान नवगज्जनित्री त्रय एनाम्महिमानः सचन्ते॥ छन्दस्वती उषसा पेपिशाने समानय्ँयोनिमनु सञ्चरन्ती। सूर्यपत्नी वि चरतः प्रजानती केतुङ्कृण्वाने अजरे भूरिरेतसा॥ ऋतस्य पन्थामनु तिस्र आऽगुस्त्रयो घर्मासो अनु ज्योतिषाऽऽ*गुः। प्रजामेका रख्षत्यूर्जमेका ॥ [२१] ॥ व्रतमेका रख्षति देवयूनाम्॥ चतुष्टोमो अभवद् या तुरीया यज्ञस्य पख्षावृषयो भवन्ती। गायत्रीन्त्रिष्टुभञ्जगतीमनुष्टुभम्बृहद्-कर्य्ँयुञ्जानाः सुवराऽभरन्निदम्॥ पञ्चभिर् धाता वि दधाविदय्ँयत् तासाꣳ स्वसृरजनयत् पञ्चपञ्च। तासामु यन्ति प्रयवेण पञ्च नाना रूपाणि क्रतवो वसानाः॥ त्रिꣳशथ् स्वसार उप यन्ति निष्कृतꣳ समानङ्केतुम्प्रतिमुञ्चमानाः ॥ [२२] ॥ ऋतूꣳस्तन्वते कवयः प्रजानतीर् मद्ध्येछन्दसः परि यन्ति भास्वतीः॥ ज्योतिष्मती प्रति मुञ्चते नभो रात्री देवी सूर्यस्य व्रतानि। वि पश्यन्ति पशवो जायमाना नानारूपा मातुरस्या उपस्थे॥ एकाष्टका तपसा तप्यमाना जजान गर्भम्महिमानमिन्द्रम्। तेन दस्यून् व्यसहन्त देवा हन्ताऽसुराणामभवच्छचीभिः॥ अनानुजामनुजाम्मामकर्त सत्यव्ँवदन्त्यन्विच्छ एतत्। भूयास ॥ [२३] ॥ मस्य सुमतौ यथा यूयमन्या वो अन्यामति मा प्र युक्त॥ अभून्मम सुमतौ विश्ववेदा आष्ट प्रतिष्ठामविदद्धि गाधम्। भूयासमस्य सुमतौ यथा यूयमन्या वो अन्यामति मा प्र युक्त॥ पञ्च व्युष्टीरनु पञ्च दोहा गाम्पञ्चनाम्नीमृतवोऽनु पञ्च। पञ्च दिशः पञ्चदशेन क्लृप्ताः समानमूर्द्ध्नीरभि लोकमेकम् ॥ [२४] ॥ ऋतस्य गर्भः प्रथमा व्यूषुष्यपामेका महिमानम्बिभर्ति। सूर्यस्यैका चरति निष्कृतेषु घर्मस्यैका सवितैकान्नि यच्छति॥ या प्रथमा व्यौच्छथ् सा धेनुरभवद्यमे। सा नः पयस्वती धुख्ष्वोत्तरामुत्तराꣳ समाम्॥ शुक्रर्षभा नभसा ज्योतिषाऽऽ* गाद्विश्वरूपा शबलीरग्निकेतुः। समानमर्थꣳ स्वपस्यमाना बिभ्रती जरामजर उष आऽगाः॥ ऋतूनाम्पत्नी प्रथमेयमाऽगादह्नान्नेत्री जनित्री प्रजानाम्। एका सती बहुधोषो व्युच्छस्यजीर्णा त्वञ्जरयसि सर्वमन्यत् ॥ [२५] ॥

(ऊर्जमेका प्रतिमुञ्चमाना भूयास मेकं पत्न्ये कान्नविꣳशतिश्च) ॥ ११ ॥

अग्ने जातान् प्र णुदा नः सपत्नान् प्रत्यजाता ञ्जातवेदो नुदस्व। अस्मे दीदिहि सुमना अहेडन् तव स्याꣳ शर्मन् त्रिवरूथ उद्भित्॥ सहसा जातान् प्र णुदा नः सपत्नान् प्रत्यजाता ञ्जातवेदो नुदस्व। अधि नो ब्रूहि सुमनस्यमानो वयꣳ स्याम प्र णुदा नः सपत्नान्॥ चतुश्चत्वारिꣳशः स्तोमो वर्चो द्रविणꣳ षोडशः स्तोम ओजो द्रविणम्पृथिव्याः पुरीषमस्य ॥ [२६] ॥ फ्सो नाम। एव श्छन्दो वरिव श्छन्दः शंभू श्छन्दः परिभू श्छन्द आच्छच्छन्दो मन श्छन्दो व्यच श्छन्दः सिन्धु श्छन्दः समुद्रञ्छन्दः सलिलञ्छन्दः सय्ँयच्छन्दो वियच्छन्दो बृहच्छन्दो रथन्तरञ्छन्दो निकाय श्छन्दो विवध श्छन्दो गिर श्छन्दो भ्रज श्छन्दः सष्टुप् छन्दो ऽनुष्टुप् छन्दः ककुच्छन्द स्त्रिककुच्छन्दः काव्यञ्छन्दोँऽङ्कुपञ्छन्दः ॥ [२७] ॥ पदपङ्क्ति श्छन्दोऽक्षरपङ्क्ति श्छन्दो विष्टारपङ्क्तिश्छन्दः क्षुरो भृज्वाञ्छन्दः प्रच्छच्छन्दः पक्ष श्छन्द एव श्छन्दो वरिव श्छन्दो वय श्छन्दो वयस्कृच्छन्दो विशालञ्छन्दो विष्पर्द्धा श्छन्द श्छदि श्छन्दो दूरोहणञ्छन्द स्तन्द्रञ्छन्दोँऽङ्काङ्कञ्छन्दः ॥ [२८] ॥

(अस्य ङ्कुपञ्छन्द स्त्रयस्त्रिꣳशच्च) ॥ १२ ॥

---

अग्निर् वृत्राणि जङ्घनद् द्रविणस्युर् विपन्यया। समिद्धः शुक्र आहुतः॥ त्वꣳ सोमासि सत्पतिस्त्वꣳ राजोत वृत्रहा। त्वम्भद्रो असि क्रतुः॥ भद्रा ते अग्ने स्वनीक सन्दृग् घोरस्य सतो विषुणस्य चारुः। न यत् ते शोचिस्तमसा वरन्त न ध्वस्मान स्तनुवि रेप आ धुः॥ भद्रन्ते अग्ने सहसिन्ननीकमुपाक आ रोचते सूर्यस्य ॥ [२९] ॥ रुशद्दृशे ददृशे नक्तया चिदरूक्षितन्दृश आ रूपे अन्नम्॥ सैनाऽनीकेन सुविदत्रो अस्मे यष्टा देवाꣳ आयजिष्ठः स्वस्ति। अदब्धो गोपा उत नः परस्पा अग्ने द्युमदुत रेवद् दिदीहि॥ स्वस्ति नो दिवो अग्ने पृथिव्या विश्वायुर् धेहि यजथाय देव। यथ् सीमहि दिविजात प्रशस्तन्तदस्मासु द्रविणन्धेहि चित्रम्॥ यथा होतर् मनुषो ॥ [३०] ॥ देवताता यज्ञेभिः सूनो सहसो यजासि। एवा नो अद्य समना समानानुशन्नग्न उशतो यक्षि देवान्॥ अग्निमीडे पुरोहितय्ँयज्ञस्य देवमृत्विजम्। होतारꣳ रत्नधातमम्॥ वृषा सोम द्युमाꣳ असि वृषा देव वृषव्रतः। वृषा धर्माणि दधिषे॥ सान्तपना इदꣳ हविर् मरुतस्तज्जुजुष्टन। युष्माकोती रिशादसः॥ यो नो मर्तो वसवो दुर्हृणायु स्तिरः सत्यानि

मरुतो ॥ [३१] ॥ जिघांꣳसात्। द्रुहः पाशम्प्रति स मुचीष्ट तपिष्ठेन तपसा हन्तना तम्॥ सँव्वँथ्सरीणा मरुतः स्वर्का उरुख्षयाः सगणा मानुषेषु। तेऽस्मत् पाशान् प्र मुञ्चन्त्वꣳहसः सान्तपना मदिरा मादयिष्णवः॥ पिप्रीहि देवाꣳ उशतो यविष्ठ विद्वाꣳ ऋतूꣳरृतुपते यजेह। ये दैव्या ऋत्विजस्तेभिरग्ने त्वꣳ होतृणामस्यायजिष्ठः॥ अग्ने यदद्य विशो अध्वरस्य होतः पावक ॥ [३२] ॥ शोचे वेष्ट्वꣳ हि यज्वा। ऋता यजासि महिना वि यद् भूर्हव्या वह यविष्ठ या ते अद्य॥ अग्निना रयिमश्ञवत् पोषमेव दिवेदिवे। यशसँव्वीरवत्तमम्॥ गयस्फानो अमीवहा वसुवित् पुष्टिवर्द्धनः। सुमित्रः सोम नो भव॥ गृहमेधास आ गत मरुतो माऽप भूतन। प्रमुञ्चन्तो नो अꣳहसः॥ पूर्वीभिर्हि ददाशिम शरद्भिर् मरुतो वयम्। महोभि ॥ [३३] ॥ श्चर्षणीनाम्॥ प्र बुद्ध्निया** ईरते वो महाꣳसि प्र णामानि प्रयज्यव स्तिरद्ध्वम्। सहस्रियन्दम्यम्भागमेतङ्गृहमेधीयम्मरुतो जुषद्ध्वम्॥ उप यमेति युवतिः सुदख्षन्दोषा वस्तोर्हविष्मती घृताची। उप स्वैनमरमतिर् वसूयुः॥ इमो अग्ने वीततमानि हव्याऽजस्रो वख्षि देवतातिमच्छ। प्रति न ईꣳ सुरभीणि वियन्तु॥ क्रिडं वः शर्द्धो मारुतमनर्वाणꣳ रथेशुभम् ॥ [३४] ॥ कण्वा अभि प्र गायत॥ अत्यासो न ये मरुतः स्वञ्चो यख्षदृशो न शुभयन्त मर्याः। ते हर्म्येष्ठाः शिशवो न शुभ्रा वथ्सासो न प्रक्रीडिनः पयोधाः॥ प्रैषामज्मेषु विथुरेव रेजते भूमिर् यामेषु यद्ध युञ्जते शुभे। ते क्रीडयो धुनयो भ्राजदृष्टयः स्वयम्महित्वम्पनयन्त धूतयः॥ उपह्वरेषु यदचिद्ध्वय्यँयिव्वय इव मरुतः केन ॥ [३५] ॥ चित् पथा। श्चोतन्ति कोशा उप वो रथेष्वा घृतमुख्षता मधुवर्णमर्चते॥ अग्निमग्निꣳ हवीमभिः सदा हवन्त विश्पतिम्। हव्यवाहम्पुरुप्रियम्॥ तꣳ हि शश्वन्त ईडते स्रुचा देवङ्घृतश्चुता। अग्निꣳ हव्याय वोढवे॥ इन्द्राग्नी रोचना दिवः > १, श्ञथद् वृत्र >२, मिन्द्रँव्वो विश्वतस्परी>३, न्द्रन्नरो >४, विश्वकर्मन्हविषा वावृधानो>५, विश्वकर्मन्हविषा वर्द्धनेन > ६ ॥ [३६] ॥

(सूर्यस्य मनुषो मरुतः पावक महोभी रथेशुभ क्केन षड्चत्वारिꣳशच्च) ॥ १३ ॥

समाप्ति कोर्वैः

(अ॒पान्त्वेम॑ न्न॒यम्पु॒रो भु॒वः प्राची᳚ ध्रु॒वक्षि॑ति॒ स्त्र्य॒वि रिन्द्रा᳚ग्नी॒ मा छन्द॑ आ॒शुस्त्रि॒वृ द॒ग्नेर्भा॒गो᳚ऽस्येक॑ ये॒यमे॒व सा या ऽग्ने॑
जा॒ता न॒ग्निर् वृ॒त्राणि॒ त्रयो॑दश)

(अ॒पान्त्वे न्द्रा᳚ग्नी इ॒यमे॒व दे॒वता॑ता॒ षड्वि॑ꣳशत्)

(अ॒पान्त्वेम॑न् ह॒विषा॒ वर्द्ध॑नेन)

॥ हरिः ॐ ॥

## चतुर्थकाण्डे तृतीयः प्रश्नः समाप्तः

| अनुवाकाः | पञ्चशत्यः |
|---|---|
| १३ | ३६ |

ॐ